षेधशास्त्रस्यैव यदिहिंसापरिहारेण लौकिकमात्रप्यय स्वाध्यायेनातो विषयसंकोचनं इत्युक्तमिति गहनाबुगा
हनेन ॥२७॥ तदिति ॥ ततस्मात्कारणात् हे वत्साः पुत्रकाः वत्सस्तर्णकपुत्रादि इव त्सेवर्षं तु वत्समिद
तिविश्वः ॥ अयंपितामहत्वात् वत्स इत्याख्यते ॥ अमश्चयत्नसम्भूयागताः समागताः इतःमतः किंप्रा
र्थयध्वं किमिच्छथ ध्वमित्यर्थः ॥ भूतलोकस्रष्टारं यूयमेव कर्तारइत्याद ॥ सृजतीति ॥ मयि लोकानां सृष्टिः अव
स्थिता रक्षायुष्मासु अथ स्थितेर्हि अतस्तदर्थमर्थिनास्मि मत्समीपस्थेत्यर्थः ॥२८॥ ततइति ॥ ततो भगवन्
प्रश्नानंतरं वासवः इन्द्रो गुरुः बृहस्पतिः ॥ गुरुर्गी ष्पतिः पित्राद्योरित्यमरः ॥ मंदानिलोद्धूतं पितोयः कम
लाकरःद्मपद्मः ॥ मंद इति निलशोकनंनेत्राणां सहस्रेण प्रेरयामास नोदयामास ॥ सहस्रं पद्मनां मारुता
ति तस्याः ॥ अनिमिषाणामपि प्रयत्नवत्त्वादसिराणसस्पंदान विरुध्यते ॥२९॥ सद्विनेत्रमिति ॥ हरिरिंद्रस्य

इंद्रो दुश्च्यवनो हरिरिति हलायुधः ॥ सहस्रनयनेभ्यो ऽधिकं सहस्रनयनाधिकं तद्रोचरार्थदर्शनादिति भावः ॥ द्वे नेत्रेय
स्य तत्तद्विनेत्रं प्रसिद्धत्वाच्चक्षुः पारयविचार इत्यर्थः ॥ वसूनां प्रभुः ॥ चक्षुर्मात्रो यस्य स्पर्शलता पर्यायिगत्वात्सरीणाम
स्वामी ॥ वाचस्पतिः करूपादित्याद्दक ॥ सख्याः षष्ठ्याः पतिपुत्रेत्यादिनासदामीतिस्वामी ॥ तन्न ॥ वदेविषयादित्वा
त्संजाल जाससंख्यप्राणमिदं वक्ष्यमाणेनुवाच ॥३०॥ एवमिति ॥ हे भगवन् प्रभुः एवंसंपन्नं पूर्वोक्तं
प्राञ्जलिः संचजाल जासनं ... प्राणमिदं वक्ष्यमाणेनुवाच ॥ ... वर्तमानसमीप्ये वर्तमानप्रयोगः ॥
स्तुतव्याहत्य परैरितिपावत भवीषितुषः पञ्चानामित्यानालादेवा ॥ वर्तमानसमीप्ये वर्तमानप्रयोगः ॥
स्तुतव्याहत्य परैरितिपावत भवीपितुबः पञ्चानामित्यानालादेश्च ... आहत्सुपलसर्गे तदेव सत्यं नोस्माकं प
थामस्तु यातः यमितिप्रयोगइत्याह ॥ आहतिमूर्तलतलाभादीति आहत्सुपलसर्गे तदेवसत्यं नोस्माकं प
इयमधिकारः ॥ परैश्चाचुभिः आमृष्ट आक्षिप्त ॥ स्वमायूत्यके वतिपुरुषं विनियुक्तान्मात्मपबं विलतरूप
स्वसर्वान्तर्यामीत्यर्थः ॥ ततक थं नज्ञास्यसि न वेदसि वर्तमानोपि षवनेभंग्याभूविष्यनिर्देशः ॥ प्रसिद्ध अ
पवनः अकर्मकाद्धेति आत्मनेपदविकल्पः ॥३१॥ उत्कमेव प्रपञ्चयति ॥ भवल्लब्धेति ॥ भवतः त्वत्तः लब्धे
नवरेण उदीर्णः दुर्जितः तारक इत्याख्या नाम यस्य स तारकाख्यो महासुरः संम्बहलेमत्वादिनातत्पुरुष
धूमकेतुरुत्पातविशेषइव लोकानां उपप्लवायोपद्रवाय उत्थितः त्वयादत्तवरोदीर्णइति वा पाठः तदा त्वया दत्त
श्वासो वर श्वेत न उदीर्णः उत्कटः ॥३२॥ पुरइति ॥ अस्यतारकस्य पुरस्थिसावन्मात्रेण तप्यते यावन्मापरि
वा

कु·र·टी·
१९

द॥अल्पेन परिमाणेन प्रमातं कालेनैव धारणे इत्यमरः॥ दीर्घिकाकमलानां उन्मेषो विकासः सोऽपि साध्यते निष्पाद्यते॥ ३३॥
सर्वाभिरिति॥ चंद्रस्तं तारकं सर्वदा अहर्निशमपि सेवते इत्यर्थः॥ सर्वाभिः कलाभिः निषेवते सेवते॥ कला तु षोडशो भागो
विल्यमरः॥ किंतु केवलामेकां॥ केवलां तत्र च हरचूडामणौ इति गम्यते॥ हरचूडामणौ कलां केवलां नोज्झति न त्यजति
ति॥ ३४॥ व्याप्त इति॥ वायुः तस्य तारकस्य अंतिके तस्य वात्यया न वात्यया कुसुमा
नास्त्याभियादस्तु उद्यानस्य ध्वंसभयतस्मात् उद्यानं व्याप्त गतिः निवसोद्यानसेवार्थं सन्निस्त्यर्थः॥ सा
पसत्वापि गमकत्वात्समासः॥ तत्पार्श्वे तत्समीपे तालवृन्तैः हृष्यते॥ तालस्य वृन्तमस्य तितालवृन्तं त
स्यानिलात् व्यजनपवनात्॥ अधिकं यथा तथा न वाति॥ व्यजनं तालवृन्तकं इत्यमरः॥ ३५॥ पर्यायेति॥
ऋतवः षट् वसंतादयः पर्यायसेवां क्रमसेवां उत्सृज्य त्यक्त्वा पुष्पाणां संभारैः सह उद्यानपालैः तस्य धानाः
ओसका सत्य इत्यर्थः॥ समर्पितास्ता आक्षिप्तेत्यमरः॥ उद्यानपालैः सामान्यमाधारणं यथा तथा तार
कं उपासते सेवंते सितो हेमादिदोषप्रकाशानुद्धरापास्तमिति भावः॥ ३६॥ तस्येति॥ सरितां पतिः स
मुद्रः तस्य तारकस्य उपायनानां योग्यानां॥ प्राभृतं तु प्रदेशनं उपायनमित्यमरः॥ रत्नानि
अंभसा अंतरा निष्पत्तेः परिपाकपर्यंतं निकृत्स्यादि समासः कथमपि महता कष्टेन प्रतीक्षते॥ कुराबाप
स्येनित्यकाम्यपरिपालयतीत्यर्थः॥ ३७॥ ज्वलदिति॥ किंचेति चार्थः॥ ज्वलंतो मणीनां शिरोरत्नानां शिखा

॥सेवदनसुमाः दीर्घाननपादपाः छेदाश्च पालाश्च येषां अभिजानाति समिताः इत्याकिंतेरुपयोगात्कर्मणि षष्ठी॥ ३८॥ विद्यु
॥न्नेति॥ सतारकः संस्रसः स च वासेन तस्य धारणानि धाम्नि समानः अनिलापर्क॥ ३९॥
नालोपर्यंते वासुकिप्रमुखा भुजंगाः सर्पाश्च विद्याश्च ध्वन्यंते॥ भुजंगाः उविसर्पयोगे इति विश्वः॥ निशिस्थिर प्रदीप
तामनियोगेन दीपत्वं ओस्येन तारकं पर्युपासते॥ परिवृत्त्य सेवंते इत्यर्थः॥ प्रदीपस्यास्थिरत्वमतेलाभूपस्तलाद
नादिभावात्॥ अत्र भृंगारिका॥ तस्य तारकस्यानिशं भुजंगसन्निधानमनुचितं तत्कथं भुजंगस्याभीतिर्यकृत
तिलाघवलसाउज्ञा॥ ३९॥ तत्कृतेति॥ चेंद्रोपि तेन कृते तारकेण कृतं तत्कृतं अनुग्रहं प्रसादं अपेक्षते इति योतस
सन्मुकुटे तद्धारितैः हस्तप्रापितैः कल्पद्रुमाणां विभूषणैः तत्संभोगैस्त्यर्थः॥ संतोषकं मृदुरनुकूलं करोति॥
३९॥ इत्थमिति॥ इत्थमाराध्यमानोऽपि सेव्यमानोऽपि भुवनत्रयं लोकत्रयं क्लिश्नाति पीडयति॥ तथाहि॥ दुर्जनः खलु प्रकार
ऐर्नेवगम्यते॥ शांतो भवेत् उपकारेण तु नानुगम्यते प्रत्युत प्रकुप्यतीति भावः॥ ४०॥ तेनेति॥ तेन तारकेण
मरवधूनां हस्तैः सुकुमारैरिति भावः॥ तैरपि सदयाय यथा स्यात्तथा आलूनाः अपचितं सामर्थ्यं छिन्नाः पल्ल
वायपातैस्तानि तस्तोप्याधिक्यनंदिताभंगयादिति भावः॥ बाष्पसीकरवर्षिभिः तासां रोदनस्यायमेव वाच
कात्वादिति भावः॥ सुरबंदीनां सुराणां बंदीकृतानां स्त्रीणां सेव्यधिभिः॥ प्रग्रहाः बंदी च धर्मित्यमरः॥ चामरैर्वीज्य
ते॥ ४२॥ उत्पादेति॥ तेन तारकेण हरितानां आनीतानां॥ हरिः सूर्यश्च सूर्याश्वेत वर्णः हरितश्च दिति
शश्वः॥ स्तरैः शापैः सूर्यानिकुर्हितानि एतेन तेन पामीन स्वं सूर्यते॥ मेरुश्रृंगाणि उत्साद्य स्वपुचेरमस्या

कु.सं.टी.
२

श्रीउच्चैःश्रवसमित्यादिनाक्रीडाशैलेषु तेपर्वतान्॥ अक्रीडापर्वताद्रित्यर्थः॥ ४२॥ कल्पिताः कृताः॥ ४३॥ मंदाकिन्याइति॥ सांप्र
तंसंप्रतिमंदाकिन्याः दिग्वारणानां दिग्गजानां मदेराविलकलुषं पयो जलमपाशीयते इतिशेषः अवन्ध्या इ
वर्ततेइतिशेषः॥ कामार्थ्यानमत्यः॥ विघ्नन्यघ्नोयुक्तइतिन पूर्वसेवत्व॥ कनककमलानिद्रुमगतानि दुरत्वाइति॥ हे
आमोऽक्रदानांस्यवमस्य॥ नितयालुतस्य वाप्यएव धामस्थानं सर्वाण्युत्पाद्यस्वर्गेर्व्वकारस्ववप्रतिरोषितवानि
त्यर्थः॥ ४४॥ भुवनेति॥ तस्यतारकस्यापातात्समायत्तर्भ याद्ग्विमानानांदेवयानानांपथि॥ अखिलप्र
तेसति॥ हेरिबिलाप्रहतेसंमेद्रत्यमरः॥ स्वर्गिभिः देवैः भुवनालोकनेन प्रीतिः सामनुभूयते॥ ४५॥ यज्व
भिरिति॥ यज्वभिः विधिवदिष्टवद्भिः॥ यज्वा तु विधिनेष्टवानित्यमरः॥ सूयज्ञा एवरूप॥ विततेषध्व
रेषु यज्ञेषु संभृतं दत्तं हव्यं मायीमायोभिः ह्रीत्यादिनाविनि॥ सतारकः नोऽस्माकं मिषतांपश्यतांपश्य
तस्त्वीत्यर्थः॥ षष्ठीनादरे इतिषष्ठी॥ जातवेदा वह्निरेव मुखं तस्माज्जातवेदोमुखाद्धरिच्छिनत्ति आच्छि
प्यगृह्णातीत्यर्थः॥ ४६॥ उच्चैरिति॥ तेन तारकेण उच्चैःश्रवसंतं सर्वविदितं उच्चैःश्रवानामहयोरत्नमि
वहयरत्नम् अश्वश्रेष्ठ॥ रत्नं स्वजातिश्रेष्ठेऽपीत्यमरः॥ तस्याश्वस्य बहुकालेसंचिते देहवत् बहुदेहमूर्तिमंत
मित्यर्थः॥ आहिताग्न्यादिषु इतिविकल्पात् निष्ठायाः परनिपातः चिरकालार्जितं इंद्रस्य यशः इहाहरि॥ ४७॥

तदस्मासामाद्युभाय प्रयोगः तत्रनकुलो भविष्यतीत्याह॥ तस्मिन्निति॥ क्रूरे घातुके नृशंसो घातुकः क्रूर इत्यमरः॥ त
स्मिन् क्रूरे संयत्वना अस्माकं उपायास् सन्निपातस्य दोषत्रयस्य वक्रापाऽऽसीन्निपातिकाविकारो ज्वरादेः सन्निपातस्येति
वक्तव्यात् वक्रमत्यय॥ वीर्यवान्त्यौषधी॥ नीवस्ततिहतास्क्रियाः विफलीप्रयोगाः जाताइतिशेषः नवंतीतिशेषः॥
तदेव मतिहतक्रियात्वमाह॥ ४८॥ जयाशेति॥ आसन्नशेषः नूनं निश्चितं अनेन हरिचक्रेणावयं जेष्यति
यच्च हरिचक्रेण अस्माकं जयाचारणप्रतिपातेन उत्थिता अर्चिषोऽद्रुतं तेजसा तेन हरि चक्रेणाविद्धाः स्फुरद्भिः
नचास्य तारकस्य कंठेनिकुरंबे भूषणे अर्पितमिव स्थितं तत्॥ स्वयमेव निकायस्थाने स्थितमित्यर्थः॥ ता
रकशिरः छेदाय हरिचक्रं स्थितं तद्दर्पेण दृष्टानि जातमित्यर्थः॥ सा इंद्रामर्त्यरानाम् इति म्यूरा भूषणे पुष्पे॥
दीनां दरेषु निष्काश्वीत्यमरः॥ ४९॥ तदीयाइति॥ अद्य संप्रति निर्जितः ऐरावतो येस्तेयोधाः तस्यता
रकस्य इमे तदीयाः गजाः पुष्कराध्य आवर्तकोष्ठनाम मेघानां कूटकः ते आद्यायां पुतेषुतो यद् पुतट
घाते वप्रक्रीडामभ्यस्यंति॥ ५०॥ एवंपराभवश्रवणेन निवेद्य संप्रतिकार्यं निवेदयति॥ तत्तस्मात्कारणात्
त्वाहे विभो स्वामिन् मुमुक्षवः अतिमोक्षवो मुमुक्षवः विरक्ताः भवस्य संसारस्य च्छेत्तये निवृत्तये कर्मबंध
नस्ये विनानिव इतिकर्मबंधच्छिदं। धिष्यं धर्ममिव आत्मज्ञानहेतुमिति शेषः। तमेव विदित्वाति मृत्युमेति

कु॰टी॰
२९

इतिरूपश्रवणात्तस्य तारकस्यैव वचनात् येनाज्ञाप्य सेनां नयतीति सेनानी। चमूपतिः॥ सत्सूद्विषेत्यादिना क्विप्॥ तं सेना
न्यं विचित्य सृष्ट्वा काम॥५१॥ गोप्तारमिति॥ सेनायाः फलमाह॥ सुरसैन्यानां गोप्तारं रक्षितारं यं सेनान्यं पुर
स्कृत्य पुरोव्यवस्थाप्येति गत्वेनामरपुरःसरगत्योरिति संस्कारः॥ गोत्राणि भिनत्तीति गोत्रभिदिति गोत्रभि
दिन्द्रः जयश्रियं बन्दीमिव बन्दीकृतां श्रियमिव चामुष्य सकाशात् प्रत्यानेष्यति सद्यमिति पूर्वेणान्वयः
॥५२॥ वचसीति॥ तस्मिन्वाहस्पत्ये वचसि अवसिते परिसमाप्ते सति आत्मभूः गिरं वाचं ससर्ज सृष्ट
वान् जगादेत्यर्थः॥ या गीः सौभाग्येन मनोहरत्वेन वृष्टिं जिगाय तत्पूर्वपदस्य कर्मधारयपदस्य लुग्भयप
द इति॥ गर्जिता गर्जितस्य वा अनन्तरं अनन्तरवर्त्तिनीं वृष्टिं जिगाय जितवती गर्जितत्वाद् वृष्टेरिवैवत
द्वि वृत्तापनाकलत्वा गिरः॥ सुभगत्वमिति भावः॥५३॥ संपत्स्यत इति॥ अयं वो युष्माकं कामो मनो
रथः सेनानीरूपः संपत्स्यते संपत्स्यति अपितु कश्चित्कालः कियानपि कालः प्रतीक्ष्यतां॥ तु अस्य
सेनान्यः सिद्धौ विषये आत्मना स्वयं सर्गः सृष्टिरेव व्यापारस्तं न यास्यामि नाहं स्रक्ष्यामीत्यर्थः॥५४॥
कुत इत्यत्राह॥ इत इति॥ इतो मत्त एव प्राप्तश्रीर्लब्धोदयः स दैत्यः तारक इतो मत्त एव क्षयं
नाशं नार्हति॥ तथाहि॥ अन्यो वास्तां तावदास्तां विषवृक्षोपि स्वयं संवर्ध्य छेत्तुमसाम्प्रतमयुक्तम्

४१

मित्यासेयं छेत्तुमसांप्रतं अनार्हः आसां तं भिन्नेवनिपातेनाहिलक्षाद्यस्तइत्यत्र हि सीयानमवति॥ अनभिहिते
कर्मणि द्वितीयाभिधानात्तथा ह वामनः निपातेनाभिहिते कर्मणि न कर्मविभक्तिः परिगणनस्य प्रायिकत्वा
दिति भावः॥५५॥ अथ वरवृत्तं वक्ष्यन् तदुपपादयति इत्याह॥ वृतमिति॥ प्राक् पूर्वं असौ तारक इदमेव वरं वरत्वेन
वृतं प्रार्थितं मया चास्मै तारकाय प्रतिश्रुतं प्रतिज्ञातं प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्तरि संप्रदान
त्वाच्चतुर्थी॥ कर्तव्यं चैतदित्याह॥ लोकान् दग्धुं अलं शक्तं त्रीन् लोकान् दग्धुं पर्याप्तं तस्मात् दुस्तरेण
पर्यायवचनं खलमर्थं स्थितिमतुप्॥ तस्य तत्परस्तत्तपः वरेण वरदानेन शमितं हि भयेति त्राषः॥५६॥ संयु
ग इति॥ संयुगे युद्धे उद्यतं व्याप्रियमाणं संयुगे साधुः सांयुगीनः॥ प्रतिजनादिभ्यः खञिति खञ्प्रत्ययः॥ तं तारकं
निषिक्तस्य क्षरितस्य नीलकण्ठलोहितस्य त्रिनेत्र इति केचिद् नीललोहित इत्यत्र त्रिपुरारेण्येमिति स्यनील
लोहितस्य धूर्जटेः रेतसः शुक्रस्यांशाद् ऋते विनान्यः कः प्रसहेत अहिंसेत अभिभवेत् प्रसहनमभिभवं
तिरस्कारः॥५७॥ अथ एषवडपद्माद्योपि जेतुं क्षमाः तत्र हेतुं वक्तुं पर्वमाहात्म्यमाह॥
सहीति॥ स देवो नीललोहितः तमःपारे प्रकृतेः परतो व्यवस्थितं तामसगुणातीतं परं ज्योतिः परमात्मा
हि॥ अत एव मया परिच्छिन्नवर्द्धिः एवमाद्यमाहिमातिशयो भवति तथा विष्णुना न च अस्मास्वसाध्यं ना
शीलयर्थः॥५८॥

४२

कु॰ टी॰
२२

समर्थमुपायमुपदिशतीति॥ उमेति॥ से कार्यार्थिनो यूयं संयमस्तिमितं समाधिनिश्चलं शंभोर्मनः उमारूपेण
उमासौंदर्ये रूपस्य आवेसोऽयं इति विभ्रमः॥ अयस्कान्तेन मणिविशेषेण कृष्टादिषु चेति संस्कारः॥ लो
हवत्॥ अयो धातुमिवेति प्रत्ययो मृग्यः आकृष्टुं हर्तुं यतध्वं प्रयतध्वं॥ ५९॥ नचराक्यं तत्रमस्तीत्याह॥
उभेति॥ उभयोः शंभोर्मम च आहितं निषिक्तं बीजं तेजः सा उमा वा शंभोस्तदीया मूर्तिर्वा तदीया
जलमयी मूर्तिर्वा उभे एव क्षमे वोढुं सोढुमित्यर्थः॥ नत्वितरे इत्यर्थः॥ एतदावेदयन्नेवमाख्याति॥
एतन्मारव्याति॥ अत्र दीपालंकारः॥ प्राकरणिकयोरुमामामहेश्वरयोः प्राकरणिकया अग्निजलमू
र्त्योश्चाप्यगम्यत्वात् यथाह दण्डी प्रस्तुताप्रस्तुतानां चोपम्यस्य गम्यत्वे दीपकमिति न च
यतुल्ययोगिता॥ तस्याः केवलप्रस्तुतविषयत्वेन केवलाप्रस्तुतविषयत्वेन तत्सादिनादिति॥ ६०॥
तस्यात्मेति॥ तस्य शितिकंठस्य हरस्य आत्मा मूर्तिः पुत्र इत्यर्थः॥ आत्मा वै पुत्रनामासीति श्रुतेः॥
वायुष्माकं सेनापतिर्भावि सेनापत्यं प्रपद्य पुरोहितादिभ्यो यक् प्रत्ययः॥ उपेत्य प्राप्य वीर्य विभूति
भिः शौर्यसंपद्भिः सुरबंदीनां वेणीर्मोक्ष्यते विश्लेषयिष्यति तारकं हनिष्यतीति भावः॥ ६१॥ इती
ति॥ इति व्याहृत्य उक्त्वा प्रकारेण विश्वस्य योनिः कारणं विश्वयोनिः ब्रह्मा॥ योनिर्स्त्रियां भगस्थाने कारणे च॥

भिकेषणे इति विजयंति॥ विबुधान्सुरान् व्याहृत्याभिधाय तिरोदधे अन्तर्हितवान् ते देवा अपि मनस्याहितं कर्तव्यं
कर्तव्यं येषां ते तथोक्ताः सन्तः दिवं स्वर्गं प्रतियुः जग्मुरित्यर्थः॥ ६२॥ तत्रेति॥ पाको नाम कश्चिदसुरः तस्य शा
सनः शासकः पाकशासन इंद्रः तत्र हरितोऽपि कार्यपरत्वेन कंदर्पे निश्चितस्य त्वरितत्वेनातिशयः॥ कार्यसिद्धौ त्वरया द्वि
गुणकृतेन हेतुना गुणेन यस्य तत्कृतं हि गुणं मन्ये तत्र हेतुगम्यस्वते न तथोक्तेन मनसा गुणस्वार्थतिशयाद्विगुणितं द्विगुणमुख्य
तनुमिति विजयंती॥ अगमत् गतः स्मरोऽस्त्वर्थः॥ बालेदुलादित्वात् पाणिनेः स्मर॥ ६३॥ अथेति॥ अथ यस्मरणानंतरं
मयस्करत इत्यर्थः॥ पुष्पधनुर्यस्य सः पुष्पधन्वा कामः वामसंख्यामिश्रकंठे आबद्धः॥ ललितं चिपुर सुंदर भिनि
ज्ञापूर्णे च ललिताया सुंदर्याः योषितो भ्रूवल्लितं इव चारुणी शृंगाग्रस्य सत तथोक्तं॥ चापं निजप्रियारतिः
स्मरप्रियाद्याच्चेति विभ्रमः॥ तस्या रतिवलयपदांके निरुद्धगणस्थानानि अंकोऽयस्मिन्तस्मिन् कंठे आस
ज्य लगयित्वा चापकं विभ्रमः॥ एताभ्यां शृंगारकानि योग्यतामुक्तं तत्र कवीरस्य शृंगारवीरोपकारे पुंलिंगत्व
स्यैरसतल्लीयज्यते॥ सहचरस्य सरव्युर्मधोर्वसंतस्य हस्ते न्यस्तः चूताङ्कुरेण बाणं यस्य सत तथोक्तः प्राञ्जलि
कृतांजलिः सन् शतमखं इन्द्रं उपतस्थे संगतिकरणे आत्मनेपदं॥ अत्र स्वभावोक्तिरलंकारः॥ स्वभावोक्ति
र्लंकारो यथावद्वस्तु वर्णनमिति मालिनी वृत्तमेतत् तदुक्तं॥ ६४॥ इति श्रीमहोपाध्याय कोलाचल मल्लिनाथस

कुमारटी॰ रिविरचितायांकुमारसंभवटीकायांसदेहविषौषध्यांसंजीविनीसमाख्यायांद्वितीयः सर्गः ॥ २ ॥ ६ ॥ श्रीगणेशाय नमः ॥
२२ उमासुदिव्यतरगारागविधातुंसहतः प्रवृत्तः ॥ स्मरस्तवासगिरिगिरिरागरागस्तस्मैनमस्तेस्मरोऽसन्नाय ॥ १ ॥ तस्मि
न्निति ॥ मघोनः इंद्रस्य अक्ष्णांसहस्रंनिरवद्यात्रादरापरिमाणायप्रमितिविदुषांसत्वादेवोचसंख्याव्यपासु
न्नेतिबहुव्रीहिः ॥ बहुव्रीहौसंख्येयेडजबहुगणादितिडच्प्रत्ययः ॥ उक्तमर्थंतात्पर्यमित्यतिः विहायत्यक्त्वात्मि
महनेयुगपत्समपातसहस्रसंप्रेक्षितिरचासीदित्यर्थः ॥ इत्यादरातिशयोक्तिः ॥ ननुचिरपरिचितान्वि
सुरसुरपतित्यागेनभगवतोमहेंद्रस्यप्रथमंकाउतस्मिनकस्मात्सपातदित्याशंक्यार्थांतरन्यास
ति ॥ प्रायः प्रभूणामप्रभूणोमाश्रितेषुसेवकेषुविषयेगौरवमादरः प्रयोजनापेक्षितयाकार्याथितेनहे
तुना चलंहि ॥ फलतेचाः प्रभूणांनतुगुणतेचाद्गतिभावः ॥ १ ॥ सइति ॥ सः कामः वासवेनेंद्रेण
आसस्वातिसिंहासनस्यसन्निकृष्टसन्निहितंयथातथा आसनेसन्निहितं ॥ चोपपत्रपद्मादेर्थ
समारूढागतेसुरपाणयानलोकेत्यादिनानिषेधात ॥ यतोनिषीदेतिहस्तेनोपवेशितिविसृष्टभूमिः दत्ताव
५ कानासन्नभर्तुःस्वामिनः प्रसादमनुग्रहंमूर्ध्नामस्तकेनप्रतिबध्यसंभाव्यमिथोरहस्येमिथोन्योन्यंरहस्यप
स्यमेरः ॥ एनमिंद्रएवंवक्ष्यमाणप्रकारेणवक्तुंप्रक्रमतोपक्रांतवान् ॥ प्रोपाभ्यामित्यात्मनेपदं ॥ २ ॥ आज्ञापयेति ॥

४५

हेतुसाहालविरोपत्तात्तसारतसावापेत्यर्थः ॥ सापेक्षत्वेगमकत्वात्समासः ॥ आज्ञापुउत्तरवाक्येयत्तदोर्नित्यसंबंधात्तनुपूर्व
केवाक्येतत्तदोर्नुपयोगसंबंधः ॥ किंतदित्याह ॥ लोकेषुततव्येपरकरणे ॥ यतकर्तव्यमस्तितदाज्ञापयस्मरणेन
प्रवृत्तउसन्नेतेनैवानुग्रहप्रसादः आज्ञापयानियोगेनसचपंडितुबुद्धिरगमयितुंइच्छामिस्मरणकृतमनुग्रहः
प्रसादेनचिन्नियोगेनसंवर्धयचकृचिदपिकर्माणियुक्तस्यर्थः ॥ अन्यथानास्तिमपरितोषमितिभावः ॥ तु
मनुपाबगिजर्थप्रवृत्तः कार्यः ॥ ३ ॥ नचमेकिंचिदसाध्यमस्तीत्याह ॥ केनेति ॥ पलकामिणास्वराज्यकामि
नकेनेरपुंसानितांतदीर्घैःशितिभिस्तपोभिः तेनवाभ्यसूयाईर्ष्याजनितात्वंप्रवृत्तइतिप्रयाप ॥ किमर्थयावद्यतः
समवेहेरी आहितसाधकस्यसंहितबाणस्यास्यमत्कार्मुकस्यनिदेशावर्ती आज्ञाधा
भवतिभविष्यतिवर्तमानसामिप्येभविष्यदर्थे लिट् ॥ आविलविनेयभविष्यतीत्यर्थः ॥ ४ ॥ संप्रतिचतु
र्वर्गमधिकृत्यमोक्षप्रतिवादमाह ॥ असंमतेति ॥ नयासमतः कः पुनर्भवः पुनरुत्पत्तिः संसारइतियावत्
वतुः तत्त्वेपर्युक्तः तेभ्यः भयतस्मान्मुक्तिमार्गप्रपन्नः त्ववद्यतः सोऽपि अोरन्चितागमिरैकेकरोगानिवर्ति
ताभिः सूभिः चतुरैः सुंदरीणांविलासैः कटाक्षैः बद्धः बिरतिसुतुंहसणवुतस्यभ्रूवोर्ललितासपादकस्य
एवहृषार्मलंसंयूपसाकौटिल्यांकुरीदुरिस्तु ॥ ५ ॥ अथधर्मार्थाविधिकृत्याह ॥ अध्यापितस्येति ॥ उशनसा

४६

कु.सं.टी.
२४

शुकेण॥नीतिमिति॥नीतिशास्त्रम ध्यापितस्यापि अपितश्शब्दः कुसदृशि ष्याणामध्यधृष्यत्वं गम्यते गतिबुद्धिप्रत्यवसानार्थ
स्यादिकर्मकादिजपाणाण्यताद् धानकर्मणोणत्वः अभ्यर्थीनेद्रुहादिशब्दमिति वचनात्तत्तद्विषः तस्यात्वदौ केस्यनरस्यअ
र्थधर्मो प्रवृत्तः प्रहितारागाविषयस्याभिलाषणस्योति धिर्द्धतोयनसाहमणिधि प्रार्थनेचारइतियादयः॥
प्रस्रवः ओधः प्रवाहः सिध्योनिद्याः सताविवपीड्याभिहतिवेद॥६॥ कामिपत्याह॥ कामिति॥एवकः पतिव
स्यासोएवपत्नीपतिव्रतानित्यसतांदिप्रइति ङीप॥ तस्याः व्रतेप्रानिव्रतेनदुःखशीला अथवा स्वभावाद्द
ढताभित्यर्थः॥ शीलस्वभावसद्वृत्ते इत्यमरः॥ चारुतया सौदर्येण हेतुना लोलं मनःचित्तं प्रविष्टा कांनितांवि
नीविमुक्तलज्जां सतीकण्ठेस्वयंग्रहीतीति स्वयंग्राहिस्वयंग्राहिणीबिभाषाग्रहइतिणिप्रत्ययः॥नचग्रहलव
रणएवग्रहादृतिनियमः॥ जन्मभोरग्राहस्यवइतिनियमादितिस्वयंग्राहाचासौनिर्पित्तत्वादाकुसलातथा
भूतोद्दं हसितदर्थपतिव्रताइच्छामिष्यामीत्यर्थः॥एतच्चेद्रस्यपरदारैकत्वादुक्तं अहिल्याद्याजारइ
ति॥७॥त्रिविधानायक्कास्यान्यास्वीयणीति॥तत्रान्याप्रत्युक्तेइतरांप्रत्याह॥कयेति॥ हेकामिन्हे
कामुक सुरतापराधात् अन्यासंगादित्यर्थः॥पादानतःप्रणतः सन्कोपनयाकोपनशीलयाकया
स्त्रिया अवधूतः तिरस्कृता सितस्याः शरीरंहठादनुतापगाढ पश्चात्तापअतएवप्रवालशय्याशर

४७

णंकरिष्यामिवद॥८॥प्रसीदेति॥किंचहेवीरत्वंप्रसीदप्रसन्नोभव॥कुलिशायुधोवज्रायुधस्तूदास्तमित्यर्थः॥
मदीयैः शरैः माघीकृतबाहुवीर्यः विफलीकृतबाहुसारः कतमः दैत्यैः दानवश्चासुरविलसतांदिबाहुनाजा
तिपरिभ्रमोऽनुत्तमप्रत्ययः॥कोपनस्फुरितायस्तेभ्यः स्त्रीभ्योपिबिभेतुकिंचत्वत्तस्तस्यप्रभ्यइत्यर्थः॥मदृ
ताः बिभ्यतीभावः॥भीत्रार्थानांभयहेतुरित्यापादानत्वात्पंचमी॥९॥तवेति॥किंबहुनातवप्रसादात्तम
नुगृहात्कुसुमायुधोप्यतिदुर्बलात्सोप्यहमेकमधुवसंतमेवसहायंलब्ध्वापिनाकः पाणायस्यतस्य
पिनाकपाणेः प्रहरणाभावेस्य परनिष्ठासप्तम्यास्तः पिनाकाजगवंधनुरित्यर्थः॥हरस्यापिहरःपि
नाकिन्यत्योतिदुर्गमेणामीति भावः॥धैर्यच्युतिकुर्वीकर्तुंशक्नुयामित्यर्थः॥शाकिलिङ्चेतिशक्यर्थे
लिङ् अन्येधन्विनोधानुष्मंतः कीदृशादितादिनिः ममकेनेकर्पीत्यर्थः॥किंशाहः बुत्से यां॥कुत्साप
श्नौचे लकेपुष्पायवकिरणइष्यतेइतिवचनात्॥१०॥अथेति॥अथकामवचनानंतरं आखंडलः
सहस्राक्षः ऊरुदेशात्पादमवतार्य पादकृत्या आक्रमेणासंभावितपादपीठयस्मिन्तद्यथातथावता
र्यसंकल्पितेअर्थे हरचित्ताकर्षणरूपेविषयेविवृतात्मशक्तिकुर्याहरस्यापितस्मानात्प्रकटितस्वसा
मर्थ्यंकामंस्मरंइदंवक्ष्यमाणंवभाषे॥११॥सर्वमिति॥हेसखेवधनगोरवाथसिखइतिपदं॥एतत्

४८

कु॰ र॰ टी॰
२५

दुक्तसर्वतः सुपन्नंसिद्धं मम बलिना विजं भवाक्श्रउभे अस्ते तव बंतपो वीर्येण बलेन महत्त्वकुं प्रतिषिद्ध
सारं त्वं चास्मिं सर्वतो गामिन्वे सा धकं च तापस धकुशमित्यर्थः॥१३॥ अवैमीति॥ हे स्मर ते तव सारं बलं
अवैमि वेद्मि अतः खलु एतस्मादेवात्मसमं तुल्यं त्वां गुरुणि महति कार्ये तस्मिन्निमोक्षिष्यमाणं नियो
क्ष्ये॥ स्वराद्यतोऽस्त्यादि वत्सत्वात्मनेपदमिति नियमः॥ तथा सारपरीक्षापूर्वकमेव सर्वत्र नियोग इत्याह
कृष्णेन विष्णुना विष्णुर्नारायणः कृष्ण इत्यमरः॥ धरतीति धरः पचाद्यच् भुवो धरस्तस्य भावो धरता तामिति
मित्यर्थः॥ अवेक्ष्य ज्ञात्वा शेषः सर्पराजो देहोद्वहनाय स्वदेहमुद्धारयितुं व्यादिश्यते पयः स्वयं चर्मणि
लीन इति चलुपर्यङ्कादिहृदयनियुज्यते भगवान्॥१४॥ नियोग॥ कार्यसिद्धिं ब्रूयात् कर्मनित्यद
आशंसते॥ वृषाङ्के हरे बाणगतिं बाणसारं आशंसता कथयता त्वया हरस्यापि त्वादिना निरूपः त्वया नोऽस्मा
कं कार्यं प्रतिपन्नकल्पं अङ्गीकृतप्रायं यत्तद् समासान्तः स्वमस्तकसमस्यः॥ देवेश्रमेतद्दित्याह॥ इदानीं यज्ञांशभुजां
प्रति उच्चैर्द्विषां महाबलानां ये ते नहि पलु सर्वभागल सूच्यते॥ ईप्सितमाप्तुमिष्टं॥ अर्थ तद्ध हरनिबो
धहरातस्स वेदस्वेत्यर्थः॥ बुध बोधने इत्यस्मा द्वितीयोऽङ्॥ अत्र च्चोऽसत्तास्त्रार्थकमानेनेत्तिनाथ व्याख्यानम
र्थव्याख्यानाओ पूर्वयोः शास्त्रितासस्योः इत्यादेर्थस्यापि नियमात्॥ यात्त्वार्थस्याभामार्णकार्थत्वात्तद्द ॥यु

४९

यं हि हरस्यापि हृत्वचानयोर्नर्थयोरभावात्॥ आशंसतेति॥१५॥ अमीति॥ हि यस्मादमी देवा वासवाः जयाय शत्रुजया
र्थं भवस्य वीर्यप्रभवं भवतेजः संभूतं सेनान्यं सेनापतिमुशन्ति कामयन्ते वश कान्तावित्यस्मात् धातोर्लट्॥ ब्रह्मांगं सुब्र
ह्मजातादिमुखानां अङ्गानां हृदयादिमेवाङ्गभूः स्थानेऽब्रह्मणि भूः ह्यतमे चन्यासस्यथः॥ ब्रह्मणि निजमत्मतस्मि
इस्त्वलक्षत्तावृहस्तमरः॥ नियोजितात्मा नियोजितचित्तः मच्चन्यासपूर्वकं ब्रह्म ध्यायन्नित्यर्थः॥ स भव
स्य तदेकेषोः तवैकस्यैक बाणस्य निपतितः तेन साध्यः अनन्यसाध्यो यस्मिन्नवसर इति भावः॥१६॥ तस्मै
ति॥ यतात्मने नियमितात्मने तस्मै भवाय रुचिरायान्तां प्रियमूर्तिलत्याः तनूजां॥ प्रयतां हिमाद्रेः तनूजां
पार्वतीं रोचयितुं रुचिरां कर्तुं यतस्व भवितव्यं चाच पार्वत्यैवेत्याह॥ योषित्सु योषितां मध्ये पत मुनि
धारणमिति सप्तमी॥ क्षमेत्यात्मभुवा तस्य हरस्य वीजस्य निषेक सारणं तस्य भूमिः सा सैव पार्वत्येव
इत्यात्मभुवा ब्रह्मणा उपदिष्टं उपदेश एव सम्भवाद्धमित्यादिनोक्तमित्यर्थः॥१७॥ सा चेदानीं सन्निहि
तेत्स्येत्याह॥ गुरोरिति॥ नगेन्द्रकन्या पार्वती गुरोः पितुर्नियोगात्तत्रासनाद्धित्यकायां हिमाद्रेरूर्ध्व
भूमौ भूमिरूर्ध्वमधित्यकेत्यमरः॥ उपाधिभ्यां त्यकन्नासन्नरूढयोरिति त्यकन् प्रत्ययः॥ तपस्यन्तं तपश्चर
न्तं कर्मणो रोमन्थतपोभ्यां वर्तिचरोरिति क्यङ् प्रत्ययः॥ ततः शतृ प्रत्ययः॥ स्थाणुं रुद्रमन्वास्त उपास्त इतीम

५०

कुर.टी.
२६

या अप्सरसां सुरेभ्यः श्रुतं ॥ नु चैतदपि भ्रममात्रमित्याह ॥ सखेति ॥ सोऽप्सरसां गणः मत्प्रणिधिः मम गूढचारः अ
स्तीत्प्रणिधिः प्रार्थने चारिद्दसि वैजयन्ती ॥ १७ ॥ तदिति ॥ तत्तस्मात्कारणात् असिध्यकार्यसिद्ध्यर्थं गह आशि
षिलाटदेयकार्यं कुरु ॥ प्रार्थने लोट् ॥ अयमर्थः ॥ प्रयोजनसमर्थास्तेरमाव्यादेवकारणात्साध्याएव बलत्का
रणात्ते पार्वतीसन्निधानमिति भावः ॥ अर्थः प्रयोजनसेवितकारणवस्तुषु इत्यमरः ॥ बीजसाध्यां
कुरः बीजांकुरः उदयादुत्पत्तेः प्राक् अम्भः बत्यामुत भप्रत्ययं कर अंकुर आर्जमपेक्षते ॥ प्रत्ययो धीनस्यापथ
ज्ञानविश्वासे हेतुषु इति विश्वः ॥ तस्मादस्मिन्नर्थे त्र्यम्बकात्त्वादनन्यसाध्यायमर्थ इति भावः १८
अस्मिन्निति ॥ सुराणां विजयाभ्युपाये अस्मिन् हरउपायभूते अस्यगतिरस्य सारः तथैव नाम नाम
मिति संभावनायां अन्येषां संभावनापि नास्तीत्यर्थः ॥ १९ अतस्त्वं कृतमस्यास्तीति कृती कृतार्थः ॥ तथाहि
अप्रसिद्धं सपि समपि अन्यसाधारणं न भवतीत्यनन्यसाधारणमेव कर्म पुंसां यशसे इदं तु प्रसिद्धं ॥ अ
साधारणं चेत् ख्यातिश्रेयस्करमिति भावः ॥ २० ॥ प्रोत्साहनार्थमाहोति ॥ सुराइति ॥ एते सुराः प्रत्यर्थेन इति
भावः समभ्यर्थयितारः याचितारः कार्यप्रयोजनं त्रयाणामपि विष्टपानां सर्वेषां बधिलो कार्थमित्यर्थः
कर्म तु तव चापेन न तु दैन्यं ॥ नत्विति ॥ यः अतिहिंस्रं तु अतिपातकं न च अहो वलतिसंबाधने अहो बत

नुकंपायां खेदे संबोधने पिबेति विश्वः अथवा अहो बत इत्याश्चर्ये बत इत्यामंत्रणे संतोषे वा बत आमंत्रणसंतोषखेदानुकंपा
विस्मयेष्वित्यमरः ॥ सुहृदः पद्योयोसि ॥ अत्र विक्रमोसि ॥ २० ॥ मधुश्चेति ॥ हे मन्मथ असौ मधुश्च वसंतोपि ते साहचर्या
त् सहचरत्वादेव अनुक्तोपि मत्प्रेरितोपि सहायएव सहकार्यएव तथाहि ॥ समीरणो वायुः हुताशनस्याग्नेश्च प्रेरयिता भ
वेति केन व्यादिश्यते उपदिश्यते ॥ अत्र मधुसमीरणयोरुक्तिमंतरेणैव हौ सेयकारणसामान्यधर्मतः ॥ सत्त्वावयवह
योर्वस्तुप्रतिवस्तुभावेन पृथक् निर्दिष्ट इति प्रतिवस्तूपमालंकारोयं ॥ तदुक्तं यत्र समानस्य निर्देशः इव पृथग्वाक्ययोर्द्विग
नोपमाश्रितासास्यात् प्रतिवस्तूपमा इति ॥ २१ ॥ तथेति ॥ यथात्वं वदसि तथाहं करिष्यामि भर्तुः स्वामिनः आज्ञां शे
षामिव प्रसाददत्तां मालामिव ॥ प्रसादोनिजनिर्माल्यदाने शेषेत्रकीर्तिता इति विश्वः ॥ दानवृद्धो द्रव्यवचनः द्रव्यदत्तनिर्म
निर्माल्यमित्यर्थः माल्यशेषादिदाने स्त्री शेषेति वैजयन्ती ॥ मूर्ध्ना प्रादाय शिरसा गृहीत्वा मदनः प्रतस्थे समवज्रविश्व
स्य हस्तात् लूनपर्दूरियारणा स्फालनेन प्रोत्साहनार्थेन ताडनेन कर्कशेन हस्तेन तदंगं मदनदेहं पस्पर्श ॥ हस्तस्पर्शेन संभा
वयास्मासेत्यर्थः ॥ शेषामिवास्तीत्यत्र च संबाधक प्रमाणाभावादुत्प्रेक्षयोः संदेहालंकारः ॥ २२ ॥ यदि भर्ताशेषां प्रसा

कु॰र॰टी॰
२७

दद्दतांमालामिवद्दस्तुपमा ॥ अथनदत्तासह्यौ उपात्नेनास्सेसते॥ उपाधानंतु सविधर्मितिः॥ २३॥ समाधवेति॥ सम
दन: अभिमतप्रियेणमरव्यासहृदामाधवेनवसंतेनरत्याद्व्यामाचांकाभ्मितिमकट्पालितइतिसमय अनुयाय
यात: मदनस्यागव्ययेनप्रार्थितावार्य सिद्धिर्यनसत्धोते: मत्वाचीत्वासर्वथादेवदेवकार्यंसाधयिष्यामि
इतिकृतनिश्चय: मनहमवतीहिमवतिम बस्याणा रुद्रस्याश्रमं जगाम॥ २५॥ तस्मिन्निति॥ तस्मिन्व
वनेस्थाणाश्रमसंयमिनां संयमवतां मुनीनां तपस्समाधेरकाग्रतायाः प्रतिकूलवर्तीइतिप्रतिकू
लवर्ती॥ संकल्पयोनेरभिमानभूतमात्मानमाधाय विरोधिमधुर्वसंतः संकल्पयोनेः मनोभवस्याभिमा
नभूतगर्वभूतामित्यर्थः॥ कार्यकारणभेदोपचारः आत्मानंनिजस्वरूपंआधायसंविधायजजृम्भेप्रादुर्
भवत्स्वमनधर्मानप्रवर्तयामास॥ २४॥ वसंतधर्मानाह॥ कुबेरगुप्तमिति॥ उष्णरश्मौसूर्येसाहसिकेन्समय
यद्दक्षिणायनकालसमयंकालं विलंघ्याकालव्यतिक्रम्य कुबेरगुप्ताधनदपालितां कुलिशनचारीर
णंकुनचिद्दसितांचदिशांउदीचीदिशंप्रतिगंतुंप्रवृत्तेसतिदक्षिणादिक
क्षिण्यवतीनायिकाचसुरवनाभ्भावेनगन्धवहंतीलिविहः पवनांधवमुखेन हः तम्मुलंव्यलीकनाभियेणदुः
खेनयानिश्वासंव्यलीकनिश्वासमिवदुःखव्यलीकव्यलीकमप्रियाकार्यं स्तपेतिवेतयंत॥ उत्ससर्जप्रवे ॥ राम
२

५३

र्यामासास्वभर्तरिसमयोल्लंघनेनपरांगनासंप्रातिप्रवृत्तेसतिप्रियाद्दाक्षिण्यवतूर्कि चिद्दूषणादुःखान्निश्व
संतीतिभावः उत्तरायणेसतिमलयमारुतः प्रवृत्तः वाक्यार्थः॥ अत्रोत्प्रेक्षालंकारः नेचसमासो
क्तिरेवयभुत्प्रेक्षाप्रतिष्टेशंकितव्यैककलिविशेषणसामर्थ्यादप्रस्तुतप्रतीतेरभावात्तिष्ठतेअत्रत,
दणेविशिष्यसामर्थ्याद्विनायकाप्रतीयेतेनचश्लेषएवप्रकृतविषयेश्लिष्टविशिष्टविशेषणानंगीकार
त्तस्मात्दक्षिणमलयंध्वनिःसचव्यलीकनिश्वासरूपचेतनधर्मसंभावनाभेदंदक्षिणस्यांदिशोनाय
कायाःसहभेदमापाद्यतत्भेदअभेदलक्षणातिशयोक्तिः उपजीविनांनिश्वासमिवेतिवाक्यात्प्रेक्षा
निवहीतिवाक्यसिद्धयंभूतइत्स्कन्धश्यामः॥ २६॥ असूतसद्यः कुसुमान्यशोकः स्कंधात्प्रभृत्येवसप
ल्लवानिपादेननापेक्षतसुंदरीणांसंपर्कमाशिंजितनूपुरेण॥ असूतेति॥ अशोकवृक्षविशेषः सद्यः सं
भात्प्रकांडात्प्रभृत्येवस्कंधमारभ्येत्यर्थः भाष्यकारवचनप्रवृत्तिर्याः पंचमीतिकैयटः भाष्यमूलानुस
सारस्त्वभावीतिकार्तिकियाप्रभृत्यग्रहणीयाः गृहणंगतेसमासइत्यादिसपल्लवानिसकुसुमानि

५४

कु॰टी॰
२८

असूतनामयमस्यजनयादित्यर्थः ॥ आविर्जितोनूपुरोयस्यं तेनचिंजिधातोरकर्मकत्वाद्र्वत्यर्थाद्दकर्मकत्वाद्दिन्या
नाकर्तरिक्तः ॥ सङ्कीर्णमपादनसंपर्कतांगनेनापसिंतस्त्रीपादघाते अशुकविभक्तिवधूगंदोहदापेक्षतेत्य
मिदं ॥ तथाच ॥ पादाहतः प्रमदयाविकसत्यशोकः शोकं जहातिबकुलोमुखसीधुसिक्तः ॥ आलोकितःकु
रबकः कुरुतेविकासमालिंगितः तिलकमुत्कलिकाविभाति ॥ २६ ॥ सद्य इति ॥ मधुर्वसंतः एवंधुकारः शर
लोद्भवः पल्लवांकुराण्येवचारूणिपत्राणिपक्षायस्मिन् पत्रंवाहनपक्षयोरित्यमरः ॥ नवचूतस्य सम
वबाणः तस्मिन्नवचूतबाणे समाप्तिपरिपूर्णतानीतस्मरस्य मनोभवस्य ध्वनिना अक्षराणि द्विरेफ
फान्भ्रमरान्सद्योनियुज्य नामास निदधौ ॥ अत्र बालपत्रत्वपुरकरणाक्षिवर्णितरूपकं मधारिणुकारि
त्यस्त्वयन्नामाक्षराणीवित्युक्तं सा ॥ नियममित्यकटेनाविसिरूपकस्थापितपमुत्प्रेक्षा ॥ २७ ॥ वर्णप्रक
र्षेति ॥ कर्णिकारः कर्णिकारपुष्पं अवयवेवर्णेण्यः ॥ पधिवृक्षम्य इत्यण्वार्थे इत्यण्‌स्य पुष्पमूलेषु बहुल
मितिलुक् ॥ एवमन्यापि द्रष्टव्यं ॥ वर्णप्रकर्षे वर्णोत्कर्षे सत्यपि निर्गंधतया हेतुना च तद्दुनोति स्म पर्यता
पयत ॥ दुनोति स्मेति स्मै लोर्थे लिट् ॥ तथाहि ॥ प्रायेण ॥ विश्वसृजो विधातुः प्रवृत्तिः गुणानां सामग्र्य

५५

विधौ सांकल्यसंपादनविषये पराङ्मुखी भवेत्रापि वस्तुनि किंचिद्वैकल्यं संपादयति ॥ तथाच चंद्रकलंकमित्य
र्थः ॥ अतः कर्णिकारे नैवैर्गध्ययुज्यत इतिभावः ॥ सामान्येन विशेषसमर्थनरूपार्थान्तरन्यासः ॥ २८ ॥
बालेंदुवक्राणीति ॥ अविकासत्वाद्विविकासत्वात्मुकुलीभावाद्भूताः वालेंदुवक्राणि अतिलोहि
तानि अतिरक्तानि पलाशानि किंशुकपुष्पाणि ॥ पलाशकिंशुकः पर्ण इत्यमरः ॥ वसंतेन पुंसा समाग
तानां स्त्रीणां सद्यः संयोगसानि पुराणक्षितिलोहितानि अस्मवादित्यर्थः ॥ नखक्षतानीवबभुः अत्रवस
तस्य वनस्थलीनां च विशेषणं साधारण्यात् ॥ नायकनायकस्य व्यवहारप्रतीतेः समासोक्तिरताव
दस्ति ॥ अथ चारनरवक्षतानीति बिलिङारतिरूपात्युत्प्रेक्षा ॥ वनकलोहित्यगुणेनिमित्ता आगतिसाच नाप
काव्यवहाराक्षिप्तसमासोक्तिगर्भकारणेनेत्यभिहिदित्यरुभयाद्रूपकवाद्ेन बलिचोषणसामर्थ्यात्स्वस्तगम्य
वेसमासोक्तिरितिलक्षणं ॥ २९ ॥ लग्नेति ॥ मधुश्रीर्वसंतलक्ष्मीः लग्नाद्विरेफाएवांजनं भक्तयः कृज्जन
रचनाः ताभिश्चित्रं विचित्रं मुखे तिलकं तिलकपुष्पमेव तिलकं विशेषकं सुरभमारमः तस्मिन्नवचक्र
मकाद्यमकल्प्य बालारुणकोमलेन बालार्क सदृशरणरागेणाकुनिम्नातेनवेलासारागेणाम्रतमवालाश

५६

प्रवालशोभेत्यलंचकार भूषयामास ॥ ३०॥ मृगाः प्रियालद्रुममञ्जरीणामिति ॥ राजादनं प्रियालः स्यादित्यम
रः ॥ प्रियालद्रुममंजरीणां राजादनतरुस्कंधानां मंजरीपरागसाररजःकणैः दिग्धाः सजातविघ्नाः तद्दर्शनापातः प्र
सारोयपांत तथोक्ताः मदोद्धताः मृगाः मरुत्प्रतिलं अनिलाभिमुखमर्मराः शुष्कवंतः पत्रमोक्षाः जीर्णपत्राः
यासुताः वनस्थलीः विचेरुः वनस्थलीषु वनप्रदेशेषु चरंतिस्म दूरगतारुढा ध्वगंतव्याः कर्मसंज्ञा ह्यकुमैरगत्य
रत्वेत्यकर्मकत्वं ॥ ३१॥ चूतांकुरेति ॥ चूतांकुरास्वादेनचकषायकंठः कषायोरसभेदेस्यात् मावपटोरुत्तपयाय
इति विश्वः ॥ पुमांश्च कोकिलः पुंस्कोकिलः पुंवद्भावः भोग्यत्वद्योतनार्थं पुंसः स्वपक्षमपरपुंसोत्वासनुषे
सकाशात्सो रुचकूज ॥ इति कस्यापादादीर्त्सकारादेशः मधुरं यथा कूज अकूजत् यत्तत्कूजनमेव मनस्वि
नीनां मानविघातदोषनिरासदक्षं समरस्य वचनमानत्यजतेत्याज्ञावचः जातं कोकिलवचनश्रवणा
नंतरं आज्ञासारवमानंजहुरित्यर्थः ॥ ३२॥ हिमव्यपायादिति ॥ हिमस्य व्यपायादपगमात् विशदाः
अधराः ओष्ठाः यासां तासां पांडुरीभूतमुखवर्णानां कुंकुमपरिहारादिति भावः किंपुरुषांगनानामपि
चविशेषकेषु पत्ररचनासु स्वेदः उद्गतः पदं चक्रे पुनर्मदिरास्वेदोदयोभूदित्यर्थः ॥ ३३॥ तपस्विन इति ॥ ॥
स्थाणोः शिवस्य स्थाणुरित्यादिति पावने आश्रमे यतितपस्विनः तत्र स्थामुनयः समानकालावा

तावस्था अकालभवा अकालिकी अकालेत्तु वसंतनंतरं विनाशिनीमित्यर्थः ॥ अकालिकशब्दात् वसंतरतिसमास
कृत्वा वाद्वाहिकृत्ययः ॥ प्रकृतेराकृतानामनिपातः द्विठाण्ठद्रत्यादिनाडीपूर्वकालवत्कालवकुशादिव ध्यत्वादि
ताडावार्थं द्वगित्यादः ॥ तामकालिकीं मधु वसंतवीविस्यमभेत्यनेनतात्वादेरेणसमस्तं मितविक्रियाणामुद
विकाराणां मनस्संचरंथवीदिशानियंतारो बभूवुः ॥ ३४ एतं वसंतमिति ॥ आरोपितमधिज्यंकृतं पुष्पचा
पं येन तस्मिन्रतिद्वितीयायस्मिच सततस्मिन्रतिसहाये मदनेनदं द्वंद्वं स्थाणुस्थाणुनवाश्रमं प्रपन्ने प्राप्ते सति
द्वंद्वानिस्थावरांगिजंगमानि च मिथुनानि क्रियाणां मुत्कर्षः काष्ठोत्कर्षे स्थितौ दिशि इत्यमरः ॥ काष्ठांगतरोप
स्नेहः इष्टस्य धनस्येव ध्रेत्रमा ममताभिमानः प्रेमानाप्रियताहार्दं प्रेमस्नेहो यद्भुमरः ॥ सण्वरसः
तेनानुविद्धं संप्रयुक्तं भावं रत्याख्यभाव क्रियया कायव्यापारेण चेष्टया विवव्रुः ॥ प्रकटीचक्रुः ततः संभ्रमं
चेष्टाः प्रवर्तत्ता ॥ ३५॥ मधुरिति ॥ मधु द्विरेफाः इति ॥ इतितत्वः ॥ ... रावादितिश्लेषलुर्भिः श्लोकेः
द्विरेफो वर्णविशेषो नाम्नियस्य स द्विरेफाभ्रमरः शब्दाच्चारणगतादर्थं पिद्विरेफ इत्युच्यते ॥ तथाहकव्य
टः ॥ वाच्यार्थं धर्मेणब्यर्थस्य व्यपदेशो दृश्यते ॥ यथा भ्रमरद्वयं द्विरेफात् द्विरेफोऽभ्रमरः ॥ तथा प्रासरस

कु.र.टी.
३०

मितिद्विरेफोभ्रमरः॥ कुसुमैकपात्रं मधुधारणं पात्रं तस्मिन्नमधु मकरंदं मधुपुष्परसेमध्वीतिविश्वः॥ प्रियां भृंगीमनु म
वर्तमानः अनुसरन्धांसमरणं यथा तत्पीतशेषमपात्किमर्थः॥ कृष्णसारः शबलः कृष्णश्चासौसारश्चेति कृष्णसारः कृष्ण
मृगः वर्णोवर्णेनेतिसमासः॥ संस्पर्शेन स्पर्शसुखेन निमीलिताक्षीं मृगीमृंगेण कंडूयतकर्षितवान् ॥कंडूयादि
भ्यो यक् इति यक् प्रत्ययः॥ ततः कर्तरि क्तः॥ ३६॥ ददौ सरः पंकजरेणुगंधि गजाय गंडूषजलं करेणुः॥ अर्धो
पभुक्तेन बिसेन जायां संभावयामास रथांगनामा॥ ददावितिति॥ करेणुः करिणीकरेणुरिभ्यां स्त्री नेद्रभइत्यम
रः॥ पंकजरेणुगंधः अस्यास्तीति पंकजरेणुगंधी गंडूषं मुखांतर्धृतजलं गजाय सरः ददौ रथांगनामा चक्रवाकः अर्धु
पभुक्तेन तथा अनुपभुंक्तेन अर्धदृष्टेन॥ बिसेन जायां संभावयामास॥ स्वजग्धं विसं ददावित्यर्थः॥ ३७॥ गीं
तांतरेष्विति॥ किंपुरुषः किन्नरः श्रमवारिलेशैः स्वेदोदकबिंदुभिः॥ किंचिदुपलक्षितसमुच्छ्रसिताः विच्छुरिताः
पत्रलेखाः यस्य तत्पुष्पासवाघूर्णितनेत्रशोभि प्रियामुखं किंपुरुषश्चुचुंबे पुष्पासवः पुष्परसः इति के
केचित॥ तेनाघूर्णिताभ्यां उद्भ्रांताभ्यां नेत्राभ्यां शोभतइति तथोक्तं॥ प्रियामुखं गीतांतरेषु गायनसंध्येषु चुचुंबे ३८॥

पर्यासीति॥ पर्याप्ताः समग्राः पुष्पस्तबकाः एव स्तनाः यासां ताभ्यः स्वांगाश्लेषप्रसर्जेपादसंयोगोपधाद्विविकल्पात
ङीप्॥ स्फुरंतः प्रवालाः एव ओष्ठाः तैर्मनोहराभ्यो लताभ्यः एव वधूभ्यः ताभ्यः सकाशात्तरवोपि लिंगाद्वपु
स्तंगम्येते॥ विनम्राः नताः एव शाखाः एव भुजाः तैर्बंधनान्यवापुः आलिंगिताइत्यर्थः॥ स्थावराणामपि मदनं
विकारोऽभूत्॥ विसृतान्यथामिति भावः॥ एतत्तु तरुलतादीनां चेतनत्वाद्युक्तं॥ तथाहि मनुः॥ अंतःसंज्ञा
भवंत्येते सुखदुःखसमन्विताः इत्यादि रूपकालंकारः॥ ३९॥ श्रुताप्सरोगीतिरपि॥ अपिशब्देन सरागवस
तामिति भावः॥ क्षणेऽस्मिन् भगवान् हरः श्रुताप्सरोगीतिरपि दिव्यांगनानां गायनं कर्णाभ्यामाकर्ण्य नाप्रियत्वं र्थः॥
प्रसंख्यानपरो आत्मानुसंधाने परायणोऽभूत्॥ तथाहि॥ आत्मनश्चित्तस्य रागाणां यत्सद्भावः स्यात्स इत्यर्थः॥ बिर
न्यंतरायाः विघ्नाः प्रत्यूहाः यस्य विधानां समधिकस्य प्रत्यय॥ जातु कदाचित समाधिभेदस्य समाधिभंगस्य ज
प्रभवः समर्थाः प्रभवंति हि॥ ४०॥ लतागृहेति॥ अथ लतागृहस्य समीपे गृहस्य द्वारगतो वामप
कोष्ठकलक्षितो रुपितहेमवेत्रो धारितहेमदंडो नंदीश्वरः॥ भृंगी भृंगिरिटिर्भृंगिरीटि नंदि नंदिनो निदिके महेशस्य नरः
मुखार्पितायाः सवोष्ठार्पिताया चर्लोके निहिताया एकस्या अंगुलेस्तर्जन्या संज्ञया चापलाय मा इति संज्ञा

कु॰र॰टी॰
३१

त्यपेतनानीमहत्मा वैश्यार्थस्वनेत्यमरः॥ गण्यानजमृगादीनन्यापलाय चापलं कर्तुं माभवतदिति क्रियार्थोपपदस्या
दिनाञ्चतुर्थी॥ चपलत्वं पाथे॥ निःसितपात्॥४१॥ न केवलं गणा एव विनीताः किन्तु जरायुजाण्डजादिकं चतुर्विधं भूतजा
जातमपि विनीतमित्याह॥ निष्कंपेति॥ निष्कंपवृक्षं स्तब्धद्रुमं निभृतद्विरेफं निश्चलभृंगं मूकाण्डजं स्वेदजाप
लक्षणमेतत्॥ मूकाण्डजानि शान्तपक्षिसर्पादिकं यस्तेनोद्भिज्जस्थिरत्वात् शान्तमृगप्रचारं जरायुजोपलक्षणमे
तत्॥ सर्वमेव काननं तच्छासनान्नन्दीश्वराज्ञया चित्रार्पितारम्भं चित्रलिखितव्यापारमिवावतस्थे॥ मृगया
द्याजरायुजाः॥ स्वेदजाः कृमिदंशाद्याः पक्षिसर्पादयोऽण्डजाः॥ उद्भिज्जास्तरुगुल्माद्याः इत्यमरः॥४२॥ दृष्टीति
ति॥ कामः प्रयाणे यात्रायां पुरोगतः शुक्रो यस्मिन् दक्षिणपुरः शुक्रं दक्षिणमिव प्रतिशुक्रं प्रतिबुधं प्रत्यङ्गार
कमेव च॥ अपि चाक्रम्य मोराजा हतसैन्यो निवर्तते॥ इति निषेधादित्यर्थः॥ तस्य देवस्य दृष्टिप्रपातं दृ
ष्टिविषयं परिहृत्य प्रान्तेषु पार्श्वेषु देवदारुसक्ताः अन्योन्यसंश्लिष्टाः नमेरुसुरपुन्नागनाम्नामारशाखा यस्य
तद्ध्यानयोग्यमित्यर्थः॥ भूतपतेः शिवस्य ध्यानास्पदं समाधिस्थानं आस्पदं प्रतिष्ठायामिति निपातः
विवेश॥४३॥ सदेवेति॥ आसन्नशरीरपातः आसन्नचारमृत्युः सकामः शार्दूलचर्मणा व्यवधानव
त्यां व्याघ्रचर्मास्तरणमित्यर्थः॥ मोक्षार्थं व्याघ्रचर्म श्रेयोमार्गार्थं सत्त्वादिति भावः॥ देवद्रुमवेदिकायां

६१

आसीनमुपविष्टं संयमिनं समाधिनिष्ठं त्र्यंबकं त्रिनेत्रं ददर्श त्र्यंबकमिति पादपूरणाय यद्वा देवास्त्रयो देवा महाकवि
प्रयोगादर्शनादियुक्तं गिरिशः कश्चित्तु साहसिकस्त्रिलोचनमिति पठति॥४४॥ तमेव वर्णयति पर्यंक इत्यादिभिः पद्य
श्लोकैः वर्णयति॥ पर्यंकेति॥ पर्यंकबन्धेन वीरासनेन स्थिरपूर्वकायं निश्चलोर्ध्वकायं ऋजुं सरलं आयतं लंबि
तं संनमितौ उभौ अंसौ यस्य तथोक्तं उत्तानौ ऊर्ध्वमुखौ उपचारादूर्ध्वस्थाने उभयत्राङ्कस्थले कृष्यते नडत्ता
नमूर्ध्वतलौ यौ पाणी तयोर्द्वयस्य संनिवेशात् संस्थानात् तस्मादंके मध्ये प्रफुल्लं विकसितं राजीवं पंकजं यस्य तमिव
स्थितं वीरासने उपविष्टः एकपादमथैकस्मिन् विन्यस्योरुणि संस्थितं॥ इतरस्मिंस्तथा चोरुं वीरासन
मुदाहृतं॥ यथाग्निगान्धार॥ उत्तानितं करतलपदमुत्तानितमपर॥ आधायांकगतं कृत्वा ध्यायेयत्तस्य सो
त्तरामिति॥४५॥ भुजंगेति॥ भुजंगमेनोन्नमध्ये बद्धजटाकलापो यस्य तं तथोक्तं कर्णावतंसः कर्णविलंबी
त्यर्थः॥ एतेन द्विगुणाद्विरावृत्तं अक्षसूत्रं अक्षमाला यस्य तं कण्ठप्रभासंगेन विशेषेण नीलां अति
नीलां त्वचं ग्रन्थिमतीं विधृतवल्कां स्कन्धसंलग्नां कृष्णमृगाजिनं दधानं॥४६॥ किंचिदिति॥ किंचित्प्रकाशा ईषत्प्रकाशाः स्ति
मिताः निश्चलाः उग्राः तारा कनीनिका येषां ते॥ तारा अक्ष्णः कनीनिका इत्यमरः॥ भ्रूविक्रियायां भ्रूविक्षेपे
विरतप्रसंगैः प्रसक्तिहीनैः अविस्पंदितपक्ष्ममालैः अचलितपक्ष्मपंक्तिभिः अधः प्रसरतां मयूखाः येषां तैः

६२

कु०र०टी०
३२

रधोमुखैः नेत्रैः वित्याकुंचयन्नु लक्षीकृत घ्राणं नासाग्रे निवेशितदृष्टिमित्यर्थः ॥ करणान्यबहिः कृत्वा स्थाणुव
भित्तिकाकृति लीलायुक्तः ॥ आसीनं हृदये ध्यायन् नासाग्रन्यस्तलोचन इति योगाचारः ॥ ४७ ॥ अवृष्टीति ॥ अंत
श्चरंतीत्यंतश्चराः तेषां मरुतां प्राणादीनां निरोधाद्धेतोः अवृष्टिसंरंभं अविद्यमानवर्षसंभ्रमम
म्बुवाहमिवास्थितं अनुत्तरंगं अनुद्भूततरंगमपां आधारं ह्रदमिवास्थि
तं एतेन प्राणवायुवृत्तिविरोधस्सूचितः ॥ न वाति निवातं देशं निष्कंपं निश्चलं प्रदीपमिवास्थितं एतेनापि वायु
विरोधः सूचितः ॥ निवातावाश्रयावातावित्यमरः ॥ ४८ ॥ कपालेति ॥ कपालनेत्रांतरेण कपालनेत्रकरोटि
नेत्रविवरेण लब्धमार्गैः अंतरं धावधिपंचस्यास्तसिद्धं ॥ उदितैः उद्गतैः ज्योतिःप्ररोहैः तेजोंकुरैः मृणाल
सूत्राधिकसौकुमार्यां यस्यास्तां बालस्येंदोः शिरःस्थस्य लक्ष्मीं ग्लपयंतं ॥ ४९ ॥ मन इति ॥
नवस्रोतो हारस्थानि छिद्राणि वर्जितानि वृत्तिसंचारो यस्य तत्तथोक्तं समाधिप्रणिधानेन वश्यं वशगतमिति
यत्स्वस्थैः प्रणिधानं समाधानं समाधिश्च समाः स्युः यदित्यभिधानात् हलायुधः ॥ मनः हृदि हृदये व्यवस्थाप्य अधिष्ठानत
तथावशिष्टः ॥ यत्तानि गीति विपर्यये तस्मिन्नब्जमलोपमे हृदये तेहि जानीयान्मनसः स्थितिकारणमिति
व्यवस्थाप्य क्षेत्रविदः क्षेत्रज्ञाः पुरुषाः यं न क्षरतीति अक्षरमविनाशिनं विदुः ॥ वदंतीति विदां लङ् वेति

६३

५३

उत्साहदत्ताः न आत्मानं परमात्मानं आत्मनि स्वस्मिन्नेवावलोकयंतं साक्षात्कुर्वाणं स्वातिरेकेण परमात्मानमवादि
तिमाचः ॥ ५० ॥ कुलकं ॥ स्मरेति ॥ स्मरस्तथाभूतं पूर्वोक्तरूपं मनसाप्यधृष्यं अयुग्मनेत्रं विषमाक्षमदूरात्पश्यन्
साध्वसेन भयेन सन्नहस्तो विश्लिष्टपाणिः सन् स्वहस्तात् स्रस्तं शरं चापं च नालक्षयत् ॥ न विवेद ॥ अतिभयादेह
सर्वां शुद्धिं जहातीति भावः ॥ ५१ ॥ निर्वाणेति ॥ अथ निर्वाणं नष्टं भूयिष्ठं प्रचुरं नष्टप्रायमित्यर्थः ॥ अस्य स्मरस्य
वीर्यं बलं वपुर्गुणेन सौंदर्यगुणेन संधुक्षयंतीव पुनरुज्जीवयंतीव धुक्षसंदु जीवइत्यमरः ॥ ह्रानोऽर्थलाताद्धि
त्स्वर्थीपु ॥ स्थिताभ्यां वनदेवताभ्यां सखीभूताभ्यां अनुप्रयाता अनुगता स्थावरराजकन्या पार्वती अदृश्य
त तेनेति शेषः ॥ ५२ ॥ अशोकेति ॥ तामेव वपुर्गुणमभिवर्णयति ॥ अशोकेन अशोकपुष्पेण निर्भर्त्सितः ति
रस्कृतः पद्मरागो येन तत्तथोक्तं आकृष्टानि हेमद्युतीनि आहृतस्वर्णाभरणानि कर्णिकाराणि यस्मिं
स्तत्तथोक्तं मुक्ताकलापीकृतानि सिंदुवाराणि निर्गुंडीकुसुमानि यस्मिन् तत्तथोक्तं सिंदुवारे इंद्र
सुरसा निर्गुंडी इंद्राणिका इत्यपि इत्यमरः ॥ वसंतपुष्पाण्येवाभरणं तद्वहंती ॥ ५३ ॥ आवर्जितेति ॥ स्त
नाभ्यां किंचिदिवावर्जिता ईषदानमिता तरुणार्कस्य रागो वर्णो यस्य तत्तथोक्तं बालार्कारुणमित्यर्थः ॥

६४

उपमानपूर्वपदबहुव्रीहिः॥ उत्तरपदलोपश्च॥ वासोवसानांतरं आच्छादयंती॥ स्तबकपर्याप्तपुष्पस्तबकाव
नम्रा पल्लविनी विसलयिनी संचारिणी लतेव स्थिता॥ ५४॥ स्रस्तामिति॥ स्थाने वदिनागनितंबादवल
[illegible] निक्षेपयोग्यस्थानविदा स्मरेणन्यासीकृतां निक्षेपीकृता कर्मणि प्रत
बनित्वा मौर्वीं धनुः कर्मण्युक्तजितिद्रुकं पत्रय॥ तस्यां द्वितीयां मौर्वीमिव स्थितां अत्याहित्य कांचीभूषणस्व
रत्नहस्तरनिपतितेनापुनःपुनः युजत इति भावः॥ नितवातस्वस्ता चालिता केसरपुष्पबकुलमालासेवकांचि
पुनःपुनरवलंबमाना हस्तेन धारयंती॥ ५५॥ सुगंधीति॥ सुगंधिनिश्वासः विवृद्धतृष्णो बिंबतुल्य अ
धरः बिंबाधरः इति विस्ता मध्यमपदलोपिन्या समास इति भावः॥ तस्यास्मिन्नधरे निर्दयस्य रहित पंचत्रनर
रा प्रतिक्षणं संभ्रमलोलदृष्टिः अच्चलाली सा तीलीलारविंदेन निवारयंती॥ ५६॥ कुलकं॥ तां वीक्ष्येति॥
सर्वावयवपर्याप्ति अनवद्यां अगद्यां अवद्यपण्यवर्यादिना निपातः रतेः कामकलत्रस्यापि ह्रीपदं निमत्त
मादधानां अन्तर्नता मार्वहंतीमित्यर्थः॥ तां पार्वतीं वीक्ष्य पुष्पचापः कामः जितेंद्रियदुर्जयेपीत्यर्थः
शर्वे विषये स्वकर्मसिद्धिं स्वकार्यसिद्धिं पुनराशशंसे भवस्य मशर्वसाध्वसं सन्नहस्तेनेत्यादिना कार्यसि

द्धेरुन्मुख्यात्वात् अभिधानात् इह पुनरुक्तं॥ ५७॥ भविष्यत इति॥ उमा च भविष्यतः पत्युः शंभोः प्रतिहारभू
मिं द्वारस्थानं समाससाद॥ द्वारि द्वारे प्रतीहारः इत्यमरः॥ स चात्मा आत्मेति संज्ञा यस्य तत्परमु
खं परं ज्योतिरन्य मुखं पुष्पादवः॥ ज्योतिर्ब्रह्मसाक्षात्कृत्य योगध्यानादुपरराम उपरतः॥ ब्याङ्
परिभ्योरम इति परस्मैपदं॥ ५८॥ ततो भुजंगेति॥ ततो भुजंगाधिपतेः शेषस्य फणाग्रैः अधोम
न्नरधृः कथंचिदतिप्रयत्नेन धृतो भूमिभागः स्थापकत्वात् भागा यस्य स तथोक्तः॥ वायुधारणाहितत्वा
घवनिरस्ता पुनर्भगवता गुरुत्वादिति भावः॥ ज्ञाने: कृतप्राणानां शकनिरुद्धानां विमुक्तिः पुनःसंचा
रो येन स कृतप्राणविमुक्तिरीशः निबिडं दृढं पर्यंकबंधं वीरासनं नाविभेदं शिथिलीचकार॥ ५९॥ तस्मा
शंसेति॥ अथ नंदी तस्मै भगवते प्रियायै शैलपुत्र्याः शुश्रूषया सेवया नि
मित्तेनोपेतां सेवार्थमागतामित्यर्थः॥ शैलसुतागमनं निवेदयामास भर्तुः स्वामिनः भ्रूक्षेपमात्रेण
भ्रूसंज्ञयैवानुमितः प्रवेशः अंगीकृतप्रवेशामेनां शैलसुतां प्रवेशयामास॥ ६०॥ तस्या इति॥ तस्याः
पार्वत्याः सखीभ्यां प्रणिपातपूर्वं स्वहस्तेन लूनः उपचितः पल्लवभंगभिन्नः किसलयखंडमिश्रः मिश्र

कु० टी०
२४

र्थः॥ शिशिरात्यय अस्य वसंतस्य सर्वं श्री पुष्पोच्चय: पुष्पोत्कर: एवं चूतस्तादि निवेशस्तोयश्रियस्य विषयत्व कवीनां
मयं प्रयोग: प्रमादिक इति वल्लभ: ॥ अथ चकपादमूले प्रणिधानात् पूर्वं नमस्कार पर्यन्ते कार्ये तथा विशिष्टं ॥६०॥
उमापि नीलेति ॥ नीलं कृकमध्यं तरोण भंत इति तथोक्ते अलकं न्यस्तानि व्यर्थ: नवकर्णिकार द्विसंसयंतिके
कर्णच्युतपल्लवा यस्य तेनस्कोशिषभध्वजायत्रणाम चकार ॥ क्रियाग्रहणात् संप्रदानं ॥६२॥ अनन्येति ॥
सा कृतत्रपणमालु विशिष्यत् अन्यानि भजतीत्यनन्यभाक्: भजोण्विरिति ण्विप्रत्यय:॥ सर्वनाम्नो वृत्तिमात्रे
पूर्वपदस्य पुंवद्भाव: ॥ पतिं श्रामुहीनिसा तथ्यं सत्यम भिहिता उक्ता ॥ उत्तरत्र तथ्य नासंवादीति भाव: ॥ खी
श्वरस्य वुगत्वादुप्रधानेभ्योऽपि शेषः ॥ तथा हि ॥ ईश्वरव्याहृतय: महापुरुषोक्तय: कदाचिदपि लोके वि
परीतार्थे संवादिनि अर्थं न पुष्यन्ति ॥ न बाधन्ते इत्यर्थ: ॥६३॥ कामइति ॥ कामस्तु बाणावसरं प्रतीक्ष्य
उमासान्निध्यानोदयम बाणप्रयोग कालइति ज्ञात्वा पतंग अग्नितुल्यं पतंगवत् शलभवत् ॥ समापन्न
गरस्य मोह लक्ष्य ॥ तेनतु मं क्रियाचेति वतुप्रत्यय: ॥ विहिमुख विशिखा: प्रचण्ड मि षु: विशिख समं

नादु प्रत्यय ॥ उमायाः समक्षं अक्षण: समीपे अव्ययी भावे शरत् प्रभृतिभ्यश्च इति समासान्तष्टच् प्रत्यय: हर बद्धलक्ष्य:
सर्वेश्वरास्मनज्ज्यां मौर्वीं मुहुरामम र्शो ॥ पुरामर्शवान् ॥६४॥ अथेति ॥ अथ गौरी शैल पास्यास्तीति तपुस्वी अर्णेम
धारसंज्ञा विनि रिति विनि प्रत्यय: ॥ तस्मै तपस्विने गिरिशाय पता ताम्ररुचा रक्तवर्णेन करेण भानुमतो सूत्रतां म
पुष्करै: विशोषितां शुष्कीकृतां मंदाकिन्या पुष्कराणि पद्मानि तेषां बीजानि तेषां मालाजपमालिकां उपनिन्ये स
मर्पितवती ॥६५॥ प्रतिग्रहीतुमिति त्रिलोचनस्य प्रणयि प्रियत्वात् अर्थि प्रियत्वात् तां भिक्षिमालां प्रति
ग्रहीतुं अंगीकर्तुं उपचक्रमे ॥ पुष्पधनुर्यस्य स: पुष्पधन्वा कामश्च बाणसंज्ञायामिति अनङादेश: संमो
हते अनेनेति संमोहनं नामेति प्रसिद्धं अमोघं बाणं धनुषि समधत्त ॥ संहितवान् उन्मादन मादनसं
हनतापन शोषणा: पंचबाण्यते ॥६६॥ हरइति ॥ हरस्तु चंद्रोदयारंभे अम्बुराशिरिव किंचिदीषत् परिवृ
त्त धैर्य: नतु प्राकृतजनवत् अत्यंतलुप्त धैर्य इति भाव: ॥ बिंबफलतुल्यौ ओष्ठाधरौ यस्य तस्मिन् उ
मामुखे विलोचनानि व्यापारयामास ॥ चिक्षिलोचने: साभिलाषमद्राक्षीदित्यर्थ: ॥ रतेन मगुरता
॥६७॥ रतिमावहतीः विरहवतीशैलसुतापि भावमंगै: स्फुरद्बालकदंबकल्पै: ॥ साचीकृता चारुतरेणतस्थौ ॥
मुखेन पर्यस्त विलोचनेन ॥ विरहवतीति ॥ शैलसुतापि स्फुरद्बालकदंबकल्पैर्विकसत्कामलनीपविटपस

कु॰ टी॰
३५

हृष्टः पुलकित इत्यर्थः ॥ ईषदपरिसमाप्तौ कल्पप्प्रत्ययः ॥ अंगैरभावं स्यारब्धं विवृण्वती ॥ शब्दाद्यन्ती ॥ चारुतरेण प
र्यस्तविलोचनेन व्रीडाप्रभातेन वदनमुखेन साची कृता तिर्यक्कृताऽस्त्यर्थः ॥ तिर्यगर्थे साचिरित्यमरः ॥ तस्थौ ह्रि
या मुखं साचीकृत्य स्थितेत्यर्थः ॥ न केवलं हरस्यैव किंतु देव्या अप्यनुदितो रतिरिति भावः ॥ ६८ ॥ अथेति ॥ अथायुग्म
नेत्रः अयुग्मानि नेत्राणि यस्य स त्रिलोचनः वशित्वात् जितेन्द्रियत्वात् इन्द्रियक्षोभं पूर्वोक्तमिन्द्रियविकारं पुन
र्बलवत् दृढं निगृह्य निवार्य स्वचेतोविकृतेः चित्तविकारस्य हेतुं कारणं दिदृक्षुः ॥ दिशामुपांते
षु दृष्टिं ससर्ज प्रसारयामास ॥ ६९ ॥ स दक्षिणेति ॥ स भगवान् दक्षिणापांगे निविष्टा स्थिता मुष्टिर्य
स्य तं तथा नतांसः आकुंचितोऽग्रे सव्यपादो यस्य तं आलीढस्थानके स्थितमित्यर्थः ॥ चक्रीकृ
तं चारु चापं मंडलीकृतं चारु चापं यः मंडलीकृतं सांप्रतं कोटिकर्णद्वयं प्रयते आलयेनिस्तनं प्रबद्ध
आलीढलक्षणमाह यादवः ॥ विविधस्थले पादौ मंडलं ॥ सामर्थ्ये स्यात् पदं आलीढ
मुत्ततायुतः ॥ दक्षिणे वामे आलीढं विपर्यये इति ॥ ७० ॥ तपइति ॥ तपसः परामर्शेन तपसः
आस्कंदनेन विवृद्धमन्योः विवृद्धकोपस्य भ्रूभंगेन दुष्प्रेक्ष्यं मुखं यस्य तस्य हरस्य तृतीयादक्ष्णः स्फु
रद्दीप्यमानः उदर्चिः उद्गतज्वालः कृशानुरग्निः सहसा अतर्कितं भवति अतर्कितं तु सहसेत्यमरः ॥ निष्पपात किल
निश्चक्राम ॥ ७१ ॥

६८

क्रोधमिति ॥ हे प्रभो स्वामिन् क्रोधं संहर संहर निवर्तय चापले द्वे भवतः इति वक्तव्ये द्विरुक्तिः ॥ संभ्रमेण द्विरुक्ति
रापन्नेति काशिका ॥ इत्येवं मरुतां देवानां गिरः शब्दाः खे व्योम्नि यावच्चरंति ॥ प्रवर्तंते तावत्कालमेव भवस्य ने
त्रात् जन्म यस्य स भवनेत्रजन्मा आवृषदुह्यादीष्यधिकरणे बहुव्रीहिः व्यजन्माद्युत्तरपदं दृष्टवामनः ॥
स वह्निः मदनं भस्मावशेषं यस्य तं तथा तं भस्मावशेषं चकार दहतीत्यर्थः ॥ ७२ ॥ तीव्रेति ॥ तीव्राभिषंग
प्रभवेण अतिदुःसहाभिनवेन अभिषंगः स्यादभिभवे संगे आक्रोशने पि च इति वैजयंती ॥ इंद्रियाणां चक्षुरा
दीनां वृत्तिं व्यापारं संस्तंभयता प्रतिबध्नता मोहेन मूर्छया कलेन रतिमाश्रित्य अज्ञातभर्तृव्यसनं मर्त्
नाशोयया सा तथोक्तास्सती रतिः उपकारे वृत्तेव ॥ सहानिः दुर्बोध नितांतम् इत्यर्थः ॥ मोहनदुःखस्य वा
दैन्यो भावात् अस्य उपकारिणी सा क्षणिक ॥ ७३ ॥ तमिति ॥ तपस्वी तपोनिष्ठः भूतपतिः शिवः तपसो विघ्नं तमाशु
तं कामं भूतमाशु वज्रः कुलिशो वनस्पतिं वृक्षमिव विभज्य भंक्त्वा स्त्रीसन्निकर्षं स्त्रीसन्निधानं परिहर्तुमिच्छन्
स्यान् इति भावः ॥ सभूतगणः सन् अंतर्दधे ॥ ७४ ॥ शैलात्मजापीति ॥ शैलात्मजापि पार्वत्यपि
उच्छिरसः उन्नतशिरसो महतः पितुरभिलाषं हराय सलिलसुन्दरमात्मनो वपुश्च व्यर्थं
निष्फलं समीक्ष्य निश्चित्य सख्योः समक्षमिति समक्षं पुरतः हेतुना अधिकजातलज्जा समानजन सेमन्नाप

७०

कुर·टी·
३६

वमानस्यातिदुःसहत्वादिति भावः ॥ अन्यानिरूप्याहाकथंचित्क्लेशेन भवनाभिमुखी जगाम ॥ अनुगाः समीपेऽनु
तिसमः । अव्ययं विभक्तीत्यादिना समीपार्थेऽव्ययीभावः ॥ प्रतिपरसमनुभ्योऽक्ष्णः इति शरत्प्रभृतिपाठा
दव्ययीभावः ॥ सोपि पिनाकीनारूप्रयोरति स्पृहेति समनसा ततनुरप्रत्ययः ॥ ७५ ॥ सपदीति ॥ असपदि अद्रि
हिमवान्रुद्रस्य संरम्भात्कोपात् भीत्या संरम्भात् संभ्रमे कोपेऽपीति विश्वः ॥ मुकुलाक्षी मीलितनयनां दु
हितोऽसवध्यहेग्णः पुगादिति पचूप्रत्ययः ॥ पिद्वारादिभ्यश्चेति ङीप् ॥ अनुकंपेत महमित्यनुकंप्यांस्व
हस्तेराख्यादिति ण्यप्रत्ययः ॥ दुहितरं दोर्भ्यां आदाय तपोलग्नोपाभिर्लीनलिनीर्थिन्तस्मरगजेइववृगन
रेहरणे दीर्घीकृतांगः आयतीकृतशरीरः पथानं प्रतिगतोप्रतिपथावाक्परित्याविनासमासोत्तरात्
प्रत्ययः ॥ प्रतिपथामार्गानुसारिणीगतिर्यस्य स प्रतीपगतिरासीत् ॥ पंथानं मनुस्रत्य जगामेत्य
र्थः ॥ ७६ ॥ इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां कुमारसंभवटीकायां सं
हविषापध्यासंजीविनीसमाख्यायां तृतीयः सर्गः ३ ॥ इदं पुस्तकं भाटवलुपनाम विद्यागोपीनाथे
नलिखितं ॥